नं. ४९९१

नाम. अमरकोशः

× × × ×

पत्र सं. ४६ — सं. ×

विषयः कोशः

३०।१५

अमरकोषः

४९९१

4991

1, 15, 16, 21, 25 to 30, and 32 to 39 Missing

F. = 29

त्रिदशा विबुधाः सुराः ॥ सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥७॥ आदितेया दिविषदो
लेखा अदितिनन्दनाः ॥ आदित्या ऋभवो स्वप्ना अमर्त्या अमृतान्धसः ॥८॥ बर्हिर्मुखाः
क्रतुभुजो गीर्वाणा दानवारयः ॥ वृन्दारका दैवतानि पुंसि वा देवता स्त्रियाम् ॥ आदि
त्यविश्ववसवस्तुषिताभास्वरानिलाः ॥ महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥१०॥
विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः ॥ पिशाचो गुह्यकः सिद्धो भूतोमी देवयोनयः ॥११॥
असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः ॥ शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ॥१२॥
सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ॥ समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः ॥१३॥
षडभिज्ञो दशबलो द्वयवादी विनायकः ॥ मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः ॥१४॥

देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः॥ वनमाली बलिध्वंसी कंसारातिरधोक्षजः॥२१॥

सषाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः॥ गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः॥१५

ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः॥ हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः॥१६॥

धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः॥ स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्वि-

धिः॥१७॥ विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः॥ दामोदरो हृषीकेशः केशवो

माधवः स्वभूः॥१८॥ दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः। पीताम्बरोऽच्युतः शार्ङ्गी

विष्वक्सेनो जनार्दनः॥१९॥ उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः॥ पद्मनाभो मधु-

रिपुर्वासुदेवस्त्रिविक्रमः॥२०॥ विश्वम्भरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः॥ वसुदे-

वोऽस्य जनकः स एवानकदुन्दुभिः॥२२॥ बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः॥ रेव

॥ कामनामानि ॥

तीश्रमणो रामः कामपालो हलायुधः ॥२३॥ नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली ॥ सङ्कर्षणः सीरपाणिः कालिन्दीभेदनो बलः ॥२४॥ मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ॥ कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ॥२६॥ शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः ॥ पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥२७॥ ब्रह्मसूर्विश्वकेतुस्स्यादनिरुद्ध उषापतिः ॥

लक्ष्मीनामानि

लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रियाः ॥२८॥ मा रमा दुग्धिजा सम्पद् इन्दिरा लोकमाता मा क्षीरोदतनया रमा ॥२९॥ प्राञ्जो लक्ष्मीपतेः पाञ्चजन्यश्चक्रं सुदर्शनः ॥ कौमोदकी गदा खड्गो नन्दकः कौस्तुभो मणिः ॥३॥ गरुत्मान्गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ॥ ना

कः पन्नगानां पुतासपतीति पन्नगाशनः

पूर्षुणं नामानि

नागानांन्तकः

सूर्यनिवर्तो विपस्यसस्सुपर्णः

गान्तको विष्णुरथस्सुपर्णः पन्नगाशनः ॥ ३१ ॥ शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः ॥
ईश्वरस्सर्व ईशानश्शङ्करश्चन्द्रशेखरः ॥ ३२ ॥ भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ॥ मृ
त्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः ॥ ३३ ॥ उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपा
लभृत् ॥ वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ॥ ३४ ॥ कृशानुरेतास्सर्वज्ञो धूर्जटिर्नी
ललोहितः ॥ हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ॥ ३५ ॥ गङ्गाधरोऽन्धकरिपुः क्रतुध्वं रामः
सी वृषध्वजः ॥ व्योमकेशो भवो भीमस्स्थाणू रुद्र उमापतिः ॥ ३६ ॥ महानटोऽष्टमूर्तिश्चाहिर्बुध्न्यो ३
यश्च घाकपिः ॥ कपर्दोऽस्य जटाजूटः पिनाकोऽजगवं धनुः ॥ ३७ ॥ प्रमथास्स्युः पारिषदा ब्राह्मी

शिवजटानामानि धं

शिवधनुषनामानि ॥ द्वयं ॥

शिवधनुष
शिवसभार्गिनामेकंनाम

त्याद्यास्तु मातरः ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ ३८ ॥ वाराही च तथेन्द्राणी चामुण्डा सप्तमा
तरः ॥ विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा ॥ ३९ ॥ अणिमा महिमा चैव गरिमा लघिमा तथा ॥
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः ॥ ४० ॥ उमा कात्यायनी गौरी काली हैमवतीश्वरी ॥
शिवा भवानी रुद्राणी सर्वाणी सर्वमङ्गला ॥ ४१ ॥ अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका
आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा ॥ ४२ ॥ विनायको विघ्नराड्द्वैमातुरगणाधिपाः ॥ अ
प्येकदन्तहेरम्बलम्बोदरगजाननाः ॥ ४३ ॥ भृङ्गरीटिर्भृङ्गिरिटिस्तु तुण्डी नन्दनो नन्दिकेश्वरे ॥ कार्त्तिके
यो महासेनः शरजन्मा षडाननः ॥ पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ॥ बाहुलेयस्ता
रकजिद्विशाखः शिखिवाहनः ॥ षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ॥ ४५ ॥ इन्द्रो मरु

यद्गङ्गा स्वर्णदी सुरदीर्घिका ॥५६॥ मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ॥ पञ्चैते देवतरवो
मन्दारः पारिजातकः ॥५७॥ सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥ सनत्कुमारो
वैधात्रः स्वर्वैद्यावश्विनीसुतौ ॥५८॥ नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ॥ स्त्रियां
बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः ॥५९॥ घृताची मेनका रम्भा उर्वशी च तिलोत्तमा ॥ सु
केशी मञ्जुघोषाद्याः कथ्यन्तेऽप्सरसो बुधैः ॥६०॥ हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौक
सः ॥ अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः ॥६१॥ कृपीटयोनिर्ज्वलनो जातवेदास्तनू
नपात् ॥ बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः ॥६२॥ आश्रयाशो बृहद्भानुः कृशा

नुः पावकोनलः॥ रोहिताश्वो वायुसखश्शिखावानाशुशुक्षणिः॥ ६३॥ हिरण्यरेता हुतभुग्दह

नो हव्यवाहनः॥ सप्तार्चिर्दमुनाश्शुक्रश्चित्रभानुर्विभावसुः॥ ६४॥ शुचिरप्पित्तमौर्वस्तु वा

डवो वडवानलः॥ वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिश्शिखा स्त्रियाम्॥ ६५॥ त्रिषु स्फु

५ लिङ्गोग्निकणः सन्तापस्संज्वरस्समौ॥ उल्कास्यान्निर्गतज्वाला भूतिर्भसितभस्मनी

धर्मराजः पितृपतिस्समवर्त्तीपरेतराट्॥ कृतान्तो यमुनाभ्राता शमनो यमराड्यमः॥ ६६॥

कालो दण्डधरश्श्राद्धदेवो वैवस्वतोन्तकः॥ प्रेताधिपः पशुहस्तः कीनाशो मृत्युरर्कजः॥ ६७

राक्षसः कौणपः क्रव्यात्क्रव्यादोस्रप आशरः॥ रात्रिञ्चरो रात्रिचरः कर्बुरो निकषात्मजः॥ ५

का

यातुधानः पुण्यजनो नैऋतो यातुराक्षसी॥ प्रचेता वरुणः पाशी यादसांपतिरप्पतिः॥७०॥ श्वसनः
स्पर्शनो वायुर्मातरिश्वा सदागतिः॥ पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः॥७१॥ समीरमारुत
मरुज्जगत्प्राणसमीरणाः॥ नभस्वद्वातपवनपवमानप्रभञ्जनाः॥७२॥ प्राणोऽपानः समानश्चोदान
व्यानौ च वायवः॥ हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः॥७३॥ उदानः कण्ठदेशस्थो व्यानः स
र्वशरीरगः॥ शरीरस्था इमे रंहस्तरसी तु रयः स्यदः॥७४॥ जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रम
रं द्रुतम्॥ सत्वरं चपलं तूर्णमविलम्बितमाशु च॥७५॥ सततानरताश्रान्तसंततविरता
निशम्॥ नित्यानवरताजस्रमप्यथातिशयो भरः॥७६॥ अतिवेलभृशात्यर्थातिमात्रोद्गा
ढनिर्भरम्॥ तीव्रैकान्तनितान्तानि गाढबाढदृढानि च॥७७॥ क्लीबे शीघ्राद्यसत्वे स्यात्

कुत्सितं बेरं शरीरं यस्य सः
कुबेरनामानि

त्रिस्त्वंबासखगामियक्ष ॥ कुवेरस्त्र्यम्बकसखो यक्षराड्गुह्यकेश्वरः ॥७०॥ मनुष्यधर्म्मा धनदो राजराजो
धनाधिपः ॥ किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः ॥७१॥ यक्षैकपिङ्गैलविलश्रीदपुण्य
जनेश्वराः ॥ अस्योद्यानं चैत्ररथं पुत्रस्तु नलकूबरः ॥७२॥ कैलासः स्थानमलका पूर्विमानं तु पु
ष्पकम् ॥ स्यात्किन्नरः किंपुरुषस्तुरङ्गवदनो मयुः ॥७३॥ निधिर्ना शेवधिर्भेदाः पद्मशङ्खाद
यो निधेः ॥ महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ ॥७४॥ मुकुन्दकुन्दनीलाश्च खर्वश्च
निधयो नव ॥ इति स्वर्गवर्गः ॥ द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् ॥ नभोन्तरिक्षं
गगनमनन्तं सुरवर्त्म खम् ॥ वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी ॥ तारापथो व्योम
नाको मेघाध्वा च महाबिलम् ॥२॥ इति व्योमवर्गः ॥ दिशस्तु ककुभः काष्ठा आशाश्च हरित

विहायसोपि नाकोपि द्युरपि स्यात्तदव्ययम्

[illegible] ८१ [illegible] कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ॥२॥

रितश्च ताः ॥१॥ प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ॥ उत्तरा दिगुदीची स्याद्दिश्यं तु त्रिषु दिग्भ

दिशि देवता नामानि — वे ॥ इन्द्रो वह्निः पितृपतिर्नैरृतो वरुणो मरुत् ॥ ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ॥

पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥३॥ करिण्योऽभ्रमुकपिला पिङ्गलानुपमाः क्रमात्

दिग्गजस्त्रीनामानि — ताम्रकर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावती ॥४॥ क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम्

अभ्यन्तरं त्वन्तरालं चक्रवालं तु मण्डलम् ॥५॥ अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ॥ — मेघनामानि

धाराधरो जलधरस्तडित्वान्वारिदोऽम्बुभृत् ॥६॥ घनजीमूतमुदिरजलमुग्धूमयोनयः ॥ का

मेघमाला नामानि — दम्बिनी मेघमाला त्रिषु मेघभवेऽभ्रियम् ॥७॥ स्तनितं गर्जितं मेघनिर्घोषे रसितादि च ॥

विद्युन्नामानि — शंपाशतह्रदाह्रादिन्यैरावत्यः क्षणप्रभाः ॥८॥ तडित्सौदामनी विद्युच्चञ्चला चपला

मेघशब्दनामानि

वर्षानामद्वयं २ विद्युत्शब्दनामानि शक्रायुधनामद्वयं

उं अ लाअपि॥ स्फूर्जथुर्वज्रनिर्घोषो मेघज्योतिरिरंमदः ॥९॥ इन्द्रायुधं शक्रधनुस्तदेव ऋजु रोहि

७ तम्॥ वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ॥ धारासंपात आसारः शीकरोम्बु

कणाः स्मृताः॥ वर्षोपलस्तु करका मेघच्छन्नेऽह्नि दुर्दिनम्॥ ११॥ अन्तर्धा व्यवधा

पुंसि त्वन्तर्धिरपवारणम्॥ अपिधानतिरोधानपिधानाच्छादनानि च॥ १२॥ हिमांशु

चन्द्रनामानि

श्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः॥ विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः १३

अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः॥ द्विजराजः शशधरो नक्षत्र राम:

चन्द्रकलानामानि

ेशः क्षपाकरः॥ १४॥ कला तु षोडशो भागो बिम्बोऽस्त्री मण्डलं त्रिषु॥ भित्तं शकल ७

चन्द्रार्धनामद्वयं २ खण्डे वा पुंस्यर्धोऽर्धं समेंऽशके॥ १५॥ चन्द्रिका कौमुदी ज्योत्स्ना प्रसादस्तु प्रसन्नता

सुधांशुनिशीकनक्षत्रेशसोमः २ चन्द्रिकानामानि ३

कलङ्काङ्कौ लाञ्छनञ्च चिह्नं लक्ष्म च लक्षणम्॥१६॥ सुषमा परमा शोभा शोभा कान्ति
द्युतिश्छविः॥ अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्॥ प्रालेयं मिहिका चाथ हिमा
नी हिमसंहतिः॥ शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जडः॥१८॥ तुषारः शीतलः शीतो
हिमः सप्तान्यलिङ्गकाः॥ ध्रुव औत्तानपादिः स्यादगस्त्यः कुम्भसम्भवः॥ मैत्रावरुणिरस्यै
व लोपामुद्रा सधर्मिणी॥ नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम्॥२०॥ दाक्षायि
ण्योश्विनीत्यादि तारा अश्वयुगश्विनी॥ राधा विशाखा पुष्ये तु सिध्यतिष्यौ श्रविष्ठया
समा धनिष्ठाः स्युः प्रोष्ठपदा भाद्रपदाः स्त्रियः॥ मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी॥२२॥

सो. नक्षत्रशिरोदेशे तारका निवसन्ति ना इल्वला

इल्वलास्तच्छिरोदेशे तारका निवसन्ति याः ॥ बृहस्पतिस्सुराचार्यो गीष्पतिर्धिषणो गुरुः ॥२३॥ जीव

अ: आंगिरसो वाचस्पतिश्चित्रशिखण्डिजः ॥ शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः ॥२४॥ अङ्गा

रकः कुजो भौमो लोहिताङ्गो महीसुतः ॥ रौहिणेयो बुधस्सौम्यस्समौ सौरिशनैश्चरौ ॥२५॥ शनिर्मन्दो

पङ्गुकालौ छायापुत्रार्कनन्दनः ॥ तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः ॥२६॥ केतुध्वजा की

तु विज्ञेयो वरुणो मरुत्सात्मजः ॥ सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः ॥२७॥ राशीनामुद

योलग्नं ते तु मेषवृषादयः ॥ मेषो वृषोथ मिथुनं कर्कटस्सिंह कन्यके ॥२८॥ तुलाथ वृश्चिको ध रामः

न्वी मकरः कुम्भमीनकौ ॥ सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः ॥२९॥ भास्कराहस्करब्रध्न ८

ध्नप्रभाकरविभाकराः ॥ भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः ॥ ३०॥ विकर्त्तनार्कमार्त्तण्ड

मिहिरारुणपूषणः ॥ द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ॥ ३१॥ विभावसुर्ग्रहपतिस्त्वि

षांपतिरहर्प्पतिः ॥ भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ॥ ३२॥ कर्मसाक्षी जगच्चक्षुर्लो कर्मसाक्षिणि

कबन्धुस्त्रयीतनुः ॥ प्रद्योतनो दिनमणिः खद्योतो लोकबान्धवः ॥ ३३॥ इनो भगो धामनिधिस्त्वं

कमलनीनांपतिः शुमाल्यब्जिनीपतिः ॥ माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्वकाः ॥ ३४॥ सूरसूतोऽरुणोऽनूरुः का य: ३१३ य: ३६६

ऐन्द्र श्यपिर्गरुडाग्रजः ॥ परिवेषस्तु परिधिरुपसूर्यकमण्डले ॥ ३५॥ किरणोऽस्रमयूखांशुगभस्तिघृणि सभीपंडानो

रश्मयः ॥ भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम् ॥ ३६॥ स्युः प्रभा रुग्रुचिस्त्विड्भाभा सधारिपार्श्व क: ८४

श्छविद्युतिदीप्तयः ॥ रोचिः शोचिरुभे क्लीबे प्रकाशो द्योत आतपः ॥ ३७॥ कोष्णं कवोष्णं म

ॐ श्र न्दोष्णं कदुष्णं त्रिषु तद्वति॥ तिग्मं तीक्ष्णं खरं तद्वन्मृगतृष्णा मरीचिका॥ ३६॥ इति दिग्वर्गः॥
६ कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः। प्रतिपद्द्वे इमे स्त्रीत्वे तदाद्यास्तिथयो द्वयोः॥१॥
घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ। प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि॥२॥
प्रभातं च दिनान्ते तु सायं सन्ध्या पितृप्रसूः॥ प्राह्णापराह्णमध्याह्नास्त्रिसन्ध्यमथ शर्वरी॥३॥
निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा॥ विभावरीतमस्विन्यौ रजनी यामिनी तमी॥४॥
तमिस्रा तामसी रात्रिर्ज्यौत्स्नी चन्द्रिकयान्विता॥ आगामिवर्तमानाहर्युक्तायां निशि प
क्षिणी॥ गणरात्रं निशा बह्व्यः प्रदोषो रजनीमुखम्॥ अर्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ
समौ॥६॥ स पर्वसन्धिः प्रतिपत्पञ्चदश्योर्यदन्तरम्॥ पक्षान्तौ पञ्चदश्यौ द्वे पौर्णमासी तु

पूर्णिमा॥ कलाहीने सानुमती पूर्णे राका निशाकरे॥ अमावस्या त्वमावास्या दर्शः सूर्येन्दुसङ्गमः॥८॥ सा दृ-
ष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः॥ उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च॥९॥ सोपप्लवोपर-
क्तौ द्वावग्न्युत्पात उपाहितः॥ एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ॥१०॥ अष्टादश निमेषास्तु काष्ठा त्रिं- मे२
शत्तु ताः कलाः॥ तास्तु त्रिंशत्क्षणस्ते तु मुहूर्तो द्वादशास्त्रियाम्॥११॥ ते तु त्रिंशदहोरात्रः पक्षस्ते दश पञ्च च
पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ॥१२॥ द्वौ द्वौ माघादिमासौ स्यादृतुस्तैरयनं त्रिभिः॥ अयने द्वे गतिरु-
दग्दक्षिणार्कस्य वत्सरः॥१३॥ समरात्रिन्दिवे काले विषुवद्विषुवञ्च तत्॥ पुष्ययुक्ता पौर्णमासी पौषी मासे
तु यत्र सा॥ नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे॥१४॥ मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः॥१५
पौषे तैषसहस्यौ द्वौ तपा माघेऽथ फाल्गुने॥ स्यात्तपस्यः फाल्गुनिकः स्याच्चैत्रे चैत्रिको मधुः॥१६॥

वैशाखे माधवो राधो ज्येष्ठे शुक्रः शुचिस्त्वयम् । आषाढे श्रावणे तु स्यान्नभाः श्रावणिकश्च सः ॥१७॥

स्युर्नभस्यप्रौष्ठपदभाद्रभाद्रपदाः समाः ॥ स्यादाश्विन इषोप्याश्वयुजोपि स्यात्तु कार्त्तिके ॥१८॥ बाहुलो

श्री र्जौ कार्त्तिकिको हेमन्तः शिशिरोस्त्रियाम् ॥ वसन्ते पुष्पसमयः सुरभिर्ग्रीष्म ऊष्मकः ॥१९॥ निदा

१९ घ उष्णोपगम उष्ण ऊष्मागमस्तपः ॥ स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत्स्त्रियाम् ॥२०॥

षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् ॥ संवत्सरो वत्सरोब्दो हायनोस्त्री शरत्समाः ॥२१॥

मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः ॥ दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम् ॥२२॥ मन्वन्त

रं तु दिव्यानां युगानामेकसप्ततिः ॥ संवर्त्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ॥२३॥ अस्त्री पं

कं पुमान्पाप्मा पापं किल्बिषकल्मषम् ॥ कलुषं वृजिनैनोघमंहो दुरितदुष्कृतम् ॥२४॥ स्या

द्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः॥ मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः॥ २५॥ स्यादानन्दथु
रानन्दः शर्मशातसुखानि च॥ श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्॥ २६॥ भावुकं भविकं भव्यं कु
शलं क्षेममस्त्रियाम्॥ शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च॥ २७॥ मतल्लिका मचर्चिका प्रकाण्ड
मुद्धतल्लजौ॥ प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः॥ २८॥ दैवं दिष्टं भागधेयं भाग्यं स्त्री नि
यतिर्विधिः॥ हेतुर्ना कारणं बीजं निदानं त्वादिकारणम्॥ २९॥ क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः
स्त्रियाम्॥ विशेषः कालिकोऽवस्था गुणाः सत्त्वं रजस्तमः॥ ३०॥ जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः॥
प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः॥ ३१॥ जातिर्जातं तु सामान्यं व्यक्तिस्तु पृथगात्मता॥ चित्तं तु चे
तो हृदयं स्वान्तं हृन्मानसं मनः॥ ३२॥ इति कालवर्गः॥ बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मति

श्री

२१

प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः ॥१॥ धीर्धारणावती मेधा संकल्पः कर्म्म मानसम् ॥ चित्ता-
भोगो मनस्कारश्चर्चा संख्या विचारणा ॥२॥ अध्याहारस्तर्क ऊहो विचिकित्सा तु संशयः ॥ स-
न्देहद्वापरौ चाथ समौ निर्णयनिश्चयौ ॥३॥ मिथ्यादृष्टिर्नास्तिकता व्यापादो द्रोहचिन्तनम् ॥ समौ
सिद्धान्तराद्धान्तौ भ्रान्तिर्मिथ्यामतिर्भ्रमः ॥४॥ संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः ॥ अङ्गीका-
राभ्युपगमप्रतिश्रवसमाधयः ॥५॥ मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ॥ मुक्तिः कैवल्य-
निर्वाणश्रेयोनिःश्रेयसामृतम् ॥६॥ मोक्षोऽपवर्गोऽथाज्ञानमविद्याहंमतिः स्त्रियाम् ॥ रूपं शब्दो ग-
न्धरसस्पर्शाश्च विषया अमी ॥७॥ गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम् ॥ कर्मेन्द्रियं तु
पाय्वादि मनोनेत्रादि धीन्द्रियम् ॥८॥ तुवरस्तु कषायोऽस्त्री मधुरो लवणः कटुः ॥ तिक्ताम्लौ च रसाः

रसेरसाः पुष्पिते या: तद्वत्तु बडमी... त्रिषु॥ विमर्दोत्थे ... जनमनोहरे ... १=

पुंसि तद्वत्तु बडमी त्रिषु॥९॥ विमर्दोत्थे परिमलो गन्धे जनमनोहरे॥ आमोदस्सोतिनिर्हारी वाच्य
लिङ्गत्वमागुणात्॥१०॥ समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः॥ इष्टगन्धः सुगन्धिः स्यादामोदी मु
खवासनः॥११॥ पूतिगन्धस्तु दुर्गन्धो विस्रं स्यादामगन्धि यत्॥ शुक्लशुभ्रशुचिश्वेतविशदश्वेतपा
पत्रो ४ ण्डुराः॥१२॥ अवदातः सितो गौरोवलक्षो धवलोर्जुनः॥ हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस्तु धूसरः॥१३॥ कृ
ष्णे नीलासितश्यामकालश्यामलमेचकाः॥ पीतो गौरो हरिद्राभः पालाशो हरितो हरित्॥१४॥
लोहितो रोहितो रक्तः शोणः कोकनदच्छविः॥ अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः॥१५॥
श्यावस्स्यात्कपिलो धूम्रधूमलौ कृष्णलोहितौ॥ कडारः कपिलः पिङ्गपिशाङ्गौ कद्रुपिङ्गलौ॥१६॥

धो पिङ्गलः वाः

अमर

चित्रं किर्म्मीरकल्माषशवलैताश्च कर्वुरे ॥ गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति ॥ १७ ॥

१२ इति धीवर्गः ॥ ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ॥ व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥ १ ॥

अपभ्रंशोऽपशब्दः स्याच्छास्त्रे शब्दस्तु वाचकः ॥ तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ॥ २ ॥

शिक्षा व्याकरणं कल्पो व्याकरणानि रुक्तं ज्योतिषं षडङ्गानि षडङ्गो वेद उच्यते

श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः ॥ स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी ॥ ३ ॥

शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं गतिः ॥ छन्दसां लक्षणं चैव षडङ्गो वेद उच्यते ॥ ४ ॥

शिक्षेत्यादि श्रुतेरङ्गमोङ्कारप्रणवौ समौ ॥ इतिहासः पुरावृत्तमुदात्ताद्यास्त्रयः स्वराः ॥ ५ ॥ आन्वी अम १२

क्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ॥ आख्यायिकोपलब्धार्था पुराणं पञ्चलक्षणम् ॥ ६ ॥

सर्वदत्त ...पादकस्य व्यासादिसरणी [illegible] ॥ चतुर्थः [illegible] दसः स्मृतः ॥

इति कोषान्तरात् — कालकृष्णादि सवत्स नाथाः कथा नामे कृम २— धर्म्म सम्बन्ध शास्त्र स्मृतिः त्र स्पनाम दूपम २—

हेतुर्विद्यानाम
सयुतमनस्य २=
चतारिवाज्ञा
पाइ२=

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥ वंश्यानुवंश्यचरितं पुराणं पञ्चलक्षणम् ॥ ७ ॥ प्रबन्धकल्प
ना कथा प्रवह्लिका प्रहेलिका ॥ स्मृतिस्तु धर्म्मसंहिता समाहृतिस्तु संग्रहः ॥ ८ ॥ समस्या तु समा
सार्था किंवदन्ती जनश्रुतिः ॥ वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वयः ॥ ९ ॥ आख्याह्वे अभिधा
नं च नामधेयं च नाम च ॥ हूतिराकारणाह्वानं संहूतिर्बहुभिः कृता ॥ १० ॥ विवादो व्यवहारः स्या
दुपन्यासस्तु वाङ्मुखम् ॥ उपोद्घात उदाहारः शपनं शपथः पुमान् ॥ ११ ॥ प्रश्नोऽनुयोगः पृच्छा च
प्रतिवाक्योत्तरे समे ॥ मिथ्याभियोगोऽभ्याख्यानमथ मिथ्याभिशंसनम् ॥ १२ ॥ अभिशापः प्रणाद
स्तु शब्दः स्यादनुरागजः ॥ यशः कीर्त्तिः समज्ञा च स्तवः स्तोत्रं स्तुतिर्नुतिः ॥ १३ ॥ आम्रेडितं द्विस्त्रिरुक्त

श्र. मुच्चैर्घुष्टं तु घोषणम् ॥ काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ॥ १४ ॥ अवर्णाक्षेपनिर्वादपरिवा
२३ दापवादवत् ॥ उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ॥ १५ ॥ पारुष्यमतिवादः स्याद्भर्त्सनं त्वपका
रगीः ॥ यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणम् ॥ १६ ॥ तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रति ॥
स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः ॥ १७ ॥ अनुलापो मुहुर्भाषा विलापः परिदेवनम् ॥ विप्रलापो विरो
धोक्तिः संलापो भाषणं मिथः ॥ सुप्रलापः सुवचनमपलापस्तु निह्नवः ॥ सन्देशवाग्वाचिकं स्याद्वाग्भे
दास्तु त्रिषूत्तरे ॥ १९ ॥ रुशती वागकल्याणी स्यात्कल्या तु शुभात्मिका ॥ अत्यर्थमधुरं सान्त्वं संगतं
हृदयंगमम् ॥ २० ॥ निष्ठुरं परुषं ग्राम्यमश्लीलं सूनृतं प्रिये ॥ सत्येऽथ संकुलक्लिष्टे परस्परपराहते ॥ २१ ॥
लुप्तवर्णपदं ग्रस्तं निरस्तं त्वरितोदितम् ॥ अम्बूकृतं सनि

अथ म्लिष्टमविस्पष्टं वितथं त्वनृतं वच

घोमबद्धं स्यादनर्थकम् ॥ २३ ॥ अनक्षरमवाच्यं स्यादाहतन्तु मृषार्थकम् ॥ अथ म्लिष्टमविस्पष्टं वितथं त्वनृत
वचः ॥ २३ ॥ सोल्लुण्ठनं तु सोत्प्रासं मणितं रतिकूजितम् ॥ अथ हृद्यं मनोहारि विस्पष्टं प्रकटोदि
तम् ॥ २४ ॥ शब्दे निनादनिनदध्वनिध्वानरवस्वनाः ॥ स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः ॥ २५ ॥
आरवारावसंरावविरावा अथ मर्मरः ॥ स्वनिते वस्त्रपर्णानां भूषणानां तु शिञ्जितम् ॥ २६ ॥ निक्वाणो नि
क्वाणः क्वाणः क्वणः क्वणनमित्यपि ॥ वीणायाः क्वणिते प्रादेः प्रक्वाणप्रक्वणादयः ॥ २७ ॥ कोला
हलः कलकलस्तिरश्चां वाशितं रुतम् ॥ स्त्री प्रतिश्रुत्प्रतिध्वाने प्रतिश्रुत्प्रतिध्वाने इति शब्दादिवर्गः
निषादर्षभगान्धारषड्जमध्यमधैवताः ॥ पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥ १ ॥ काक
गीतं गानमिमे समे × = २

अ.
२४

लीतुकलेसूक्ष्मेध्वनौतुमधुरास्फुटे॥कलोमन्द्रस्तुगम्भीरेतारोत्युच्चैस्त्रयस्त्रिषु॥१॥समन्वितलय

स्त्वेकतालोवीणातुवल्लकी॥विपञ्चीसातुतन्त्रीभिःसप्तभिःपरिवादिनी॥३॥ततंवीणादिकंवाद्य

मानद्धंमुरजादिकम्॥वंशादिकंतुसुषिरंकांस्यतालादिकंघनम्॥४॥चतुर्विधमिदंवाद्यंवादित्रा

तोद्यनामकम्॥मृदङ्गामुरजाभेदास्त्वङ्क्यालिङ्ग्योर्ध्वकास्त्रियः॥५॥स्याद्यशःपटहोढक्काभेरीस्त्री

दुन्दुभिःपुमान्॥आनकःपटहोस्त्रीस्यात्कोणोवीणादिवादनम्॥६॥वीणादण्डःप्रवालःस्यात्क

कुभस्तुप्रसेवकः॥कोलम्बकस्तुकायोस्याउपनाहोनिबन्धनम्॥७॥वाद्यप्रभेदाडमरुमड्डुडिण्डिमझर्झराः।

मर्दलःपणवोन्येचनर्तकीलासिकेसमे॥८॥विलम्बितंद्रुतंमध्यंतत्त्वमोघोघनःक्रमात्॥तालः राम

कालक्रियामानंलयःसाम्यमथास्त्रियाम्॥९॥ताण्डवंनटनंनाट्यंलास्यंनृत्यंचनर्तनं॥ २४

काहलातूर्यभाडेस्यात्मुखवाद्यपञ्चसप्तद्या

स्रं तिमिरं तमः ॥ ध्वान्ते गाढेऽन्धतमसं क्षीणेऽवतमसं तमः ॥ इति पातालवर्गः ॥ विष्वक्सन्तमसं नागाः काद्र
वेयाः स्तदीश्वरः ॥ शेषोऽनन्तो वासुकिस्तु सर्पराजोऽथ गोनसे ॥१॥ तिलित्सः स्यादजगरे शयुर्वाहस
इत्युभौ ॥ अलगर्द्दो जलव्यालस्समौ राजिलडुण्डुभौ ॥२॥ मालुधानो मातुलाहिर्निर्मुक्तो मुक्तक
ञ्चुकः ॥ सर्प्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः ॥३॥ आशीविषो विषधरश्चक्री व्यालस्सरीसृपः ॥
कुण्डली गूढपाच्चक्षुश्श्रवाः काकोदरः फणी ॥ दर्वीकरो दीर्घपृष्ठो दन्दशूको विलेशयः ॥ उरगः पन्न
गो भोगी जिह्मगः पवनाशनः ॥५॥ त्रिष्वाहेयं विषास्थ्यादि स्फटायां तु फणा द्वयोः ॥ समौ कञ्चुक
निर्मोकौ क्ष्वेडस्तु गरलं विषम् ॥६॥ पुंसि क्लीवे च काकोलकालकूटहलाहलाः ॥ सौराष्ट्रिकः शौल्कि
केयो ब्रह्मपुत्रः प्रदीपनः ॥७॥ दारदो वत्सनाभश्च विषभेदा अमी नव ॥ विषवैद्यो जाङ्गलिको

काश॥ व्यालग्राह्य तुंडिकाः कथ्यते १

व्यालग्राह्यहितुण्डिकः॥८॥ इति भोगिवर्गः॥ स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम्॥ तद्भे
दास्तपनावीचिमहारौरवरौरवाः॥ संघातः कालसूत्रं चेत्याद्याः सत्त्वास्तु नारकाः॥ प्रेता वैतर
१२ · णीसिन्धुः स्यादलक्ष्मीस्तु निरृतिः॥२॥ विष्टिराजूः कारणा तु यातना तीव्रवेदना॥ पीडा बाधा व्य
था दुःखमामनस्यं प्रसूतिजम्॥३॥ स्यात्कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामि यत्॥ इति नरकवर्गः
समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः॥ उदन्वानुदधिः सिन्धुः सरस्वान्सागरोऽर्णवः॥१॥ रत्नाक
रो जलनिधिर्यादःपतिरपाम्पतिः॥ तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे॥२॥ आपः स्त्री भूम्नि वा
र्वारि सलिलं कमलं जलम्॥ पयः कीलालममृतं जीवनं भुवनं वनम्॥३॥ कबन्धमुदकं पाथः पु

कारं सर्वतोमुखम्॥ अम्भोर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम्॥४॥ मेघपुष्पं घनरसस्त्रिषु द्वे
आप्यमम्मयम्॥ भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु॥५॥ महत्सूल्लोलकल्लोलौ स्यादावर्त्तो
म्भसां भ्रमः॥ पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियः॥६॥ चक्राणि पुटभेदाः स्युर्भ्रमाश्च जलनिर्गमाः॥
कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु॥७॥ पारावारे परार्वाची तीरे पात्रं तदन्तरम्॥ द्वीपोऽस्त्रियामन्त
रीपं यदन्तर्वारिणस्तटम्॥८॥ तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम्॥ निषद्वरस्तु जम्बालः प
ङ्कोऽस्त्री शादकर्दमौ॥९॥ जलोच्छ्वासाः परीवाहाः कूपकास्तु विदारकाः॥ नाव्यं त्रिलिङ्गं नौ
तार्य्यं स्त्रियां नौस्तरणिस्तरिः॥१०॥ उडुपं तु प्लवः कोलः स्रोतोम्बुसरणं स्वतः॥ आतरस्तरपण्यं

अ० स्याड्डोणी काष्ठाम्बुवाहिनी ॥११॥ सांयात्रिकः पोतवणिक्कर्णधारस्तु नाविकः ॥ नियामकाः पो
१८ तवाहाः कूपको गुणवृक्षकः ॥१२॥ नौकादण्डः क्षेपणी स्यादरित्रं केनिपातकः ॥ अभ्रिः
स्त्री काष्ठकुद्दालस्सेकपात्रं तु सेचनम् ॥१३॥ यानपात्रं तु पोतोऽब्धिभवे सामुद्रियं
त्रिषु ॥ सामुद्रिको मनुष्योऽथ ज्ञातादौ नौस्समुद्रिकाः ॥१४॥ क्लीबेऽर्द्धनावं नावोऽर्द्धे
तीतनौकेतिनु त्रिषु ॥ त्रिष्वागाधात्प्रसन्नोऽच्छः कलुषोऽनच्छ आविलः ॥१५॥ निम्नं गभीरं ग १८॥
म्भीरमुत्तानं तद्विपर्यये ॥ अगाधमतलस्पर्शे कैवर्ते दाशधीवरौ ॥१६॥ आनायः पुंसि जा राम:
लं स्याच्छणसूत्रं पवित्रकम् ॥ मत्स्याधानी कुवेणी स्याद्बडिशं मत्स्यवेधनम् ॥१७॥ पृ

घुरो माऊ षो मत्स्यो मीनौ वैसारिणो ऽण्डजो ॥ विसारः शकुली चाथ गडकः शकुलार्भकः ॥ १८
सहस्रदंष्ट्रः पाठीन उलूपी शिशुकः समौ ॥ जलमीने ऽथ आलि चिमः श्रोष्ठी तुण्डाकरीद्वयोः ॥ १९
क्षुद्राण्डमत्स्यसङ्घातः पोताधानमथो झषाः ॥ रोहितो मद्गुरश्शालो राजीवः शकुलस्तिमिः ॥ २०
तिमिङ्गिलादयश्चाथ यादांसि जलजन्तवः ॥ तद्भेदाश्शिशुमारोद्रशङ्कवो मकरादयः ॥ २१
स्यात्कुलीरः कर्कटकः कूर्मे कमठकच्छपौ ॥ ग्राहोवहारो नक्रस्तु कुम्भीरोऽथ महीलता ॥ २२
गण्डूपदः किञ्चुलुको निहाका गोधिका समे ॥ रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः ॥ २३
मुक्तास्फोटः स्त्रियां शुक्तिः शङ्खः स्यात्कम्बुरस्त्रियौ ॥ क्षुद्रशङ्खाः शङ्खनकाः शम्बूका जलशुक्तयः ॥ २४ ॥ भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः ॥ शिली गण्डूपदी भेकी वर्षाभ्वी कमठी डुलिः

ॐ नमः शि

अ॰ १९ मद्गुरस्य प्रियाशृङ्गी दुर्नामा दीर्घकोशिका ॥ जलाशयो जलाधारस्तत्रागाधजलो ह्रदः ॥२६॥
आवाहस्तु निपानं स्यादुपकूपजलाशये ॥ पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा ॥२७॥ ने
मिस्त्रिकास्य वीनाहो मुखबन्धनमस्य यत् ॥ पुष्करिण्यां तु खातं स्यादखातं देवखातकं ॥२८
पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः ॥ वेशन्तः पल्वलं चाल्पसरो वापी तु दीर्घिका ॥२९॥ पत्रः
खेयं तु परिखाधारस्त्वम्भसां यत्र धारणम् ॥ स्यादालवालमावालमावापोऽथ नदी सरित् ॥३०॥ १९
तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी ॥ स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा ॥३१॥
कूलंकषा निर्झरिणी रोधोवक्रा सरस्वती ॥ गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ॥३२॥
भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ॥ कालिन्दी सूर्यतनया यमुना शमनस्वसा ॥३३॥ रे

रेवातुनर्म्मदासोमोद्भवामेकलकन्यका॥करतोयासदानीरावाहुदाशीतवाहिनी॥३४॥शतद्रुस्तु
शतद्रूःस्याद्विपाशातुविपाट्स्त्रियाम्॥शोणोहिरण्यवाहस्स्यात्कुल्याल्पाकृत्रिमासरित्॥३५॥
शरावतीवेत्रवतीचन्द्रभागासरस्वती॥कावेरीसरितोन्याश्चसम्भेदसिन्धुसङ्गमः॥३६॥द्वयोःप्रण
लीपयसःपदव्यांत्रिषुतूत्तरे॥देविकायांसरय्वांचभवेदाविकसारवौ॥३७॥सौगन्धिकन्तुक
ल्हारंहल्लकंरक्तसन्धिकम्॥स्यादुत्पलंकुवलयमथनीलाम्बुजन्मच॥३८॥इन्दीवरन्तुनी
लेस्मिन्सितेकुमुदकैरवे॥शालूकमेषांकन्दस्स्याद्वारिपर्णीतुकुम्भिका॥जलनीलेतुशैवा
लंशैवलोथकुमुद्वती॥कुमुदिन्यांनलिन्यांतुविसिनीपद्मिनीमुखाः॥वापुंसिपद्मंनलिनम
रविन्दमहोत्पलम्॥४१॥सहस्रपत्रंकमलंशतपत्रंकुशेशयम्॥पङ्केरुहंतामरसंसार

करहाटः शिफा कन्दः किञ्जल्कः केसरोऽस्त्रियां

संसरसीरुहम् ॥४२॥ विसप्रसूनराजीवपुष्कराम्भोरुहाणि च ॥ पुण्डरीकं सिताम्भोजमथ

अ. २ व रक्तसरोरुहे ॥४३॥ रक्तोत्पलं कोकनदं नालो नालमथा स्त्रियाम् ॥ मृणालं बिसम् अब्जादि

कदम्बे षण्डमस्त्रियां ॥४४॥ स्याद्वर्णिकानवदलं बीजकोशो वराटकः ॥ इति वारिवर्गः ॥

१० ॥ उक्तं स्वर्व्योमदिक्कालधीशब्दादि सनाट्यकं ॥ पातालभोगिनरकं वारि चैषां च सं

गतम् ॥१॥ इत्यमरकोशे सुबादिकाण्डे नामलिङ्गानुशासने प्रथमकाण्डः साङ्ग एव

समर्थितः ॥ ओं ॥ वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः ॥ नृब्रह्मक्षत्रविट्शूद्रैः सा २ भागः

ङ्गोपाङ्गैरिहोदिताः ॥१॥ भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरा ॥ धराधरित्रीध

नारोवत्मदुर्गमम्॥ गव्यूतिस्त्रीक्रोशयुगं नल्वःकिष्कुचतुःशतम्॥१९॥ घण्टापथःसंसरणं तत्पुरस्योपनिष्करम्॥ द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी॥ दिवस्पृथिव्यौ संज्ञायुक्तमस्यात्तु वर्णकः॥ इति क्षितीयकाण्डे भूवर्गः॥ पूः स्त्री पुरी नगर्यौ वा पत्तनं पुटभेदनम्॥ स्थानीयनिगमोऽन्यत्तु यन्मूलनगरात्पुरम्॥१॥ तच्छाखानगरं वेशो वेश्याजनसमाश्रयः॥ आपणस्तु निषद्यायां विपणिः पण्यवीथिका॥ रथ्या प्रतोली विशिखा स्याच्चयो वप्रमस्त्रियाम्॥ प्राकारो वरणः सालः प्राचीनं प्रान्ततो वृतिः॥ भित्तिः स्त्री कुड्यमेडूकं यदन्तर्न्यस्तकीकसम्॥ गृहं गेहोदवसितं वेश्म सद्म निकेतनम्॥४॥ निशान्तं वस्त्यं भवनं सदनागारमन्दिरम्॥ गृहाः पुंसि

अ. सोऽभूम्न्येव निकाय्यनिलयालयाः॥५॥ वासः कुटी द्वयोः शाला सभा सञ्जवनं त्विदम्॥ चतुःशालं मुनीनां तु
२२ पर्णशालोटजोऽस्त्रियाम्॥६॥ चैत्यमायतनं तुल्ये वाजिशाला तु मन्दुरा॥ आवेशनं शिल्पशाला प्रपा पानी
यशालिका॥७॥ मठश्छात्रादिनिलयो गञ्जा तु मदिरागृहम्॥ गर्भागारं वासगृहमरिष्टं सूतिकागृह
कुट्टिमोऽस्त्री निबद्धा भूश्चन्द्रशाला शिरोगृहम्॥ वातायनं गवाक्षोऽथ मण्डपोऽस्त्री जनाश्रयः॥९॥ हर्म्या
दि धनिनां वासः प्रासादो देवभूभुजाम्॥ सौधोऽस्त्री राजसदनमुपकार्योपकारिका॥१०॥ स्वस्तिक
सर्वतोभद्रो नन्द्यावर्तादयोऽपि च॥ विच्छन्दक प्रभेदा हि भवन्तीश्वरसद्मनाम्॥११॥ स्त्र्यागार
भूभुजामन्तःपुरं स्यादवरोधनम्॥ शुद्धान्तश्चावरोधश्च स्यादट्टः क्षौममस्त्रियाम्॥१२॥ प्रघाणप्र
घाणालिन्दा बहिर्द्वारप्रकोष्ठके॥ गृहावग्रहणी देहल्यङ्गनं चत्वराजिरे॥१३॥ अधस्ताद्दा

शिलानासादारूपरिस्थितम् ॥ प्रछन्नमन्तर्द्वारं स्यात्पक्षद्वारन्तु पक्षकम् ॥ १४ ॥ वलीकनीध्रे पटल
प्रान्तेथ पटलं छदिः ॥ गोपानसी तु वलभी छादने वक्रदारुणि ॥ १५ ॥ कपोतपालिकायान्तु विटङ्कं
पुंनपुंसकम् ॥ स्त्री द्वार्द्वारं प्रतीहारः स्याद्वितर्दिस्तु वेदिका ॥ १६ ॥ तोरणोस्त्री बहिर्द्वारं पुरद्वारन्तु गो
पुरम् ॥ कूटं पूर्द्वारि यद्धस्तिनखस्तस्मिन्नथ त्रिषु ॥ १७ ॥ कपाटमररं तुल्ये तद्विष्कम्भोर्गलं न ना ॥
आरोहणं स्यात्सोपानं निश्रेणिस्त्वधिरोहिणी ॥ १८ ॥ सम्मार्जनी शोधनी स्यात्सङ्करोवकरस्तथा ॥
क्षिप्ते मुखं निस्सरणं सन्निवेशो निकर्षणम् ॥ १९ ॥ समौ संवसथग्रामौ वेश्मभूर्वास्तुरस्त्रियाम् ॥ ग्रा
मान्त उपशल्यं स्यात्सीमसीमे स्त्रियामुभे ॥ २० ॥ घोष आभीरपल्ली स्यात्पक्कणः शबरालयः ॥ इ
पुरवर्गः ॥ महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः ॥ अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ॥

३८

ग्रामसन्त
नामानी
मरजी
दाला मानि

अ॰ २२ पर्वतनाम पर्वतः
लोकालोकश्चक्रवालः त्रिकूटस्त्रिककुत्समौ॥ अस्तस्तु चरमः क्ष्माभृदुदयः पूर्वपर्वतः॥२॥
हिमवान्निषधो विन्ध्यो माल्यवान्पारियात्रकः॥ गन्धमादनमन्ये च हेमकूटादयो नगाः॥३
हिमालयोऽद्रिराजः स्यान्मलयश्चन्दनाचलः॥ पाषाणप्रस्तरग्रावोपलाश्मानः शि
लादृषत्॥४॥ कूटोऽस्त्री शिखरं शृङ्गं प्रपातस्त्वतटो भृगुः॥ कटकोऽस्त्री नितम्बोऽद्रेः स्नुः प्रस्थ
शिखरनामानि
सानुरस्त्रियाम्॥५॥ उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः॥ दरी तु कन्दरो वा स्त्री देवखा
निर्झरनामानि गुफनामानि
तबिले गुहा॥ गह्वरं गण्डशैलास्तु च्युताः स्थूलोपला गिरेः॥६॥ खनिः स्त्रियामाकरः राम: २२
स्यात्पादाः प्रत्यन्तपर्वताः॥ उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका॥७॥ धातुर्मन

गेहसमीपे उपवनं गेहोपवनं॥

शिलाधातुर्गैरिकन्तु विशेषतः॥८॥ निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे॥ इत्तिशैलवर्गः॥

अटव्यरण्यं विपिनं गहनं काननं वनम्॥ महारण्यमरण्यानी गृहारामास्तु निष्कुटाः॥१॥ आरामः स्या-

दुपवनं कृत्रिमं वनमेव यत्॥ अमात्यगणिकागेहोपवने वृक्षवाटिका॥२॥ पुमानाक्रीड उद्या-

नं राज्ञः साधारणं वनम्॥ स्यादेतदेव प्रमदवनमन्तःपुरोचितम्॥३॥ वीथ्यालिरावलिः पङ्क्ति-

श्रेणी लेखास्तु राजयः॥ वन्या वनसमूहे स्यादङ्कुरोऽभिनवोद्भिदि॥४॥ वृक्षो महीरुहः शाखी वि-

टपी पादपस्तरुः॥ अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः॥५॥ वानस्पत्यः फलैः पुष्पा-

त्तैरपुष्पाद्वनस्पतिः॥ ओषध्यः फलपाकान्ताः स्यादवन्ध्यः फलेग्रहिः॥६॥ वन्ध्योऽफलो वि

फलान्विरफलातिइति उत्पत्तिनाते: फलैर्वनस्पति रुच्यते ...॥

अ॰ केप्याचिफलवान्फलिनफली ॥ प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः ॥ ७ ॥ फुल्लश्चैते विकसि
२४ ते स्युरवन्ध्यादयस्त्रिषु ॥ स्थाणुर्वा ना ध्रुवः शङ्कुः ह्रस्वशाखाशिफः क्षुपः ॥ ८ ॥ अप्रकाण्डे स्तम्बगु
ल्मौ वल्ली तु व्रततिर्लता ॥ लता प्रतानिनी वीरुद्गुल्मिन्युलप इत्यपि ॥ ९ ॥ नगाद्यारोह उच्छ्रा
य उत्सेधश्चोच्छ्रयश्च सः ॥ अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः ॥ १० ॥ समे
शाखालते स्कन्धशाखाशाले शिफाजटे ॥ शाखाशिफावरोहः स्यान्मूलाच्चाग्रं गताल
ता ॥ ११ ॥ शिरोग्रं शिखरं वा ना मूलं बुध्नोऽङ्घ्रिनामकः ॥ सारो मज्जा समो त्वक्स्त्री वल्कं वल्क २४
लमस्त्रियाम् ॥ १२ ॥ काष्ठं दार्विन्धनं त्वेधः इध्ममेधः समित्स्त्रियाम् ॥ निष्कुहः कोटरं वा

ण्ण्स्ता एीज्या काश्यपी चितिः ॥ २ ॥ सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा ॥ गोत्रा कुः पृथिवी पृ
थ्वी क्ष्मावनिर्म्मेदिनी मही ॥ ३ ॥ भूतधात्री रत्नगर्भा विपुला सागराम्बरा ॥ मृन्मृत्तिका प्रशस्ता
तु मृत्सा मृत्स्ना तु मृत्तिका ॥ ३ ॥ उर्वरा सर्वसस्याढ्या स्यादूषः क्षारमृत्तिका ॥ ऊषवानूषरो
द्वावप्यन्यलिङ्गौ स्थलं स्थली ॥ ४ ॥ समानौ मरुधन्वानौ द्वे खिलाप्रहते समे ॥ त्रिष्वथो जगती लो
को विष्टपं भुवनं जगत् ॥ ५ ॥ लोकोयं भारतं वर्षं शरावत्यास्तु यावधेः ॥ देशः प्राग्दक्षिणः प्राच्य
उदीच्यः पश्चिमोत्तरः ॥ ६ ॥ प्रत्यन्तो म्लेच्छदेशः स्यान्मध्यदेशस्तु मध्यमः ॥ आर्यावर्तः पुण्यभू
मिर्मध्यं विन्ध्यहिमागयोः ॥ ७ ॥ नीवृज्जनपदो देशविषयौ तूपवर्त्तनम् ॥ त्रिष्वागोष्ठान्नड
प्रायेनड्वान्नड्वल इत्यपि ॥ ८ ॥ कुमुद्वान्कुमुदप्राये वेतस्वान्बहुवेतसे ॥ शाद्वलः शाद्

२

द्धरितेसजम्बालेतुपङ्किलः॥९॥जलप्रायमनूपंस्यात्पुंसिकच्छस्तथाविधः॥स्त्रीशर्कराशर्करिला

अ शार्करःशर्करावति॥१०॥देशएवादिमावेवमुन्नेयाःसिकतावति॥देशोनद्यम्बुवृष्ट्यम्बुसं

२२ पन्नव्रीहिपालितः॥११॥स्यान्नदीमातृकोदेवमातृकश्चयथाक्रमम्॥सुराज्ञिदेशेराज

न्वान्स्यात्ततोन्यत्रराजवान्॥१२॥गोष्ठंगोस्थानकन्तत्तुगौष्ठीनम्भूतपूर्वकम्॥पर्यन्तभूःप

रिसरःसेतुरालौपुमान्स्त्रियाम्॥१३॥वामलूरश्चनाकुश्चवल्मीकंपुन्नपुंसकम्॥अय

नंवर्त्ममार्गाध्वपन्थानःपदवीसृतिः॥१४॥सरणिःपद्धतिःपद्यावर्त्मन्येकपदीतिच॥

अतिपन्थाःसुपन्थाश्चसत्पथश्चार्चितेध्वनि॥१५॥व्यध्वोदुरध्वोविपथःकदध्वाका

पथस्समे॥अपन्थास्त्वपथंतुल्येशृङ्गाटकचतुष्पथे॥१६॥प्रान्तरन्दूरशून्योध्वा

धवः प्रियः पतिर्भर्त्ता जारः स्तूपपतिः समौ ॥१७॥ अमृते जारजः कुंडो मृते भर्त्तरि गोलकः । भ्रात्रेयो भ्रातृजो भ्रातृभ
गिन्यौ भ्रातरावुभौ ॥१८॥ मातापितरौ पितरौ प्रसूजनयितारौ । श्वश्रूश्वशुरौ श्वशुरौ पुत्रौ पुत्रश्च दुहिता च ॥१९॥
दंपती जंपती जायापती भार्यापती च तौ ॥ गर्भाशयो जरायुः स्यादुल्बं च कललोऽस्त्रियां ॥२०॥ सूतिमासो वैजननो
गर्भो भ्रूण इमौ समौ । तृतीयाप्रकृतिः षंढः क्लीबः पंडो नपुंसके ॥२१॥ शिशुत्वं शैशवं बाल्यं तारुण्यं यौवनं समे
स्यात्स्थाविरं तु वृद्धत्वं वृद्धसंघेऽपि वार्द्धिकं ॥२२॥ पलितं जरसा शौक्ल्यं केशादौ विस्र[redacted] जरा ॥ स्यादुत्तानशया डिंभा
स्तनपा च स्तनंधयी ॥२३॥ बालस्तु स्यान्माणवको वयस्थस्तरुणो युवा ॥ प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरं
न्नपि ॥ वर्षीयान्दशमी [redacted] पूर्वजस्त्वग्रियोऽग्रजः ॥ जघन्यजे स्युः कनिष्ठयवीयोऽवरजानु

ॐ
अ.को.
द्वि. ४०

ज्ञाः ॥ २५ ॥ अमांसोदुर्बलश्छातोबलवान्मांसलोंसल ॥ तुंदिलस्तुंदिभस्तुंदीबृहत्कुक्षिःपिचंडिलः ॥ २६ ॥ अव
टीटोवनाटश्चावभ्राटोनतनासिके ॥ केशवः केशिकःकेशीवलिनोवलिभःसमौ ॥ २७ ॥ विकलांगस्तुपोगण्डः
खर्वोह्रस्वश्चवामनः ॥ खुरणाःस्यात्खुरणसोविग्नोविगतनासिकः ॥ २८ ॥ खरणाःस्यात्खरणसः ---
40 ------- ॥ ऊर्ध्वज्ञुरूर्ध्वजानुःस्यात्संज्ञुःसंहतजानुकः ॥ २९ ॥ स्यादेडेबधिरःकुब्जेगडुलःकुकरेकुणिः ॥ करं
बकस्तुवाङ्कर्णःखलतिस्तैंद्रलुप्तकः ॥ ३० ॥ पृश्निरल्पतनौश्रोणःपंगौमुंडस्तुमुंडिते ॥ बलिरःकेकरखोटे
खंजस्त्रिषुजरावरं ॥ ३१ ॥ जडुलःकालकःपिप्लुस्तिलकस्तिलकालकः ॥ अनामयंस्यादारोग्यंचिकित्सारुक्प्र ॐ
तिक्रिया ॥ ३२ ॥ भेषजौषधभैषज्यान्यगदोजायुरित्यपि ॥ स्त्रीरुग्रुजाचोपतापरोगव्याधिगदामयाः ॥ ३३ ॥ शून्य राम

४०

स्मा त्वयशोषः प्रतिश्यायस्तु पीनसः ।। स्त्रीक्षुत्क्षुतं क्षवः पुंसि कासस्तु क्षवथुः पुमान् ।। ४८ ।। शोफस्तु श्वयथुः शोथः पादस्फो
टो विपादिका ।। किलाससिध्मे कच्छ्वां तु पामपामा विचर्चिका ।। ४९ ।। कंडूः खर्जूस्तु कंडूया विस्फोटः पिटकं त्रिषु ।। व्रणो
स्त्रियामीर्ममरुः क्लीवे नाडीव्रणः पुमान् ।। ५० ।। कोठो मंडलकं कुष्ठश्वित्रे दुर्नामकार्शसी ।। आनाहस्तु विबंधः स्याद्ग्रहणीरु
क्प्रवाहिका ।। ५१ ।। प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः ।। व्याधिभेदा विद्रधिः स्त्री ज्वरमेहभगंदराः ।। ५२ ।। अश्म
रीमूत्रकृच्छ्रं स्यात्पूर्वे शुक्रावधेस्त्रिषु ।। रोगहार्यगदंकारो भिषग्वैद्यौ चिकित्सके ।। ५३ ।। वार्तो निरामयः कल्य उल्लाघो निर्ग
तो गदात् ।। ग्लानग्लास्नू [illegible]मयावी विकृतो व्याधितोऽपटुः ।। ५४ ।। आतुरोऽभ्यमितोऽभ्यान्तः समौ पामनकच्छुरौ ।। दद्रुणो
दद्रुरोगी स्यादर्शोरोगयुतोऽर्शसः ।। वातकी वातरोगी स्यात्सातिसारोऽतिसारकी ।। स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः

न॰ को॰ ॥ क्लिन्ने क्लिन्नं वायमी ॥ ४३ ॥ उन्मामस उन्मातवतिस्त्रेषलः स्रेषणस्त्र ॥ न्यङ्गे हगने हस्ताद्गूढं नामौखं दिलनुदिमे
द्वि॰ ॥ ४४ ॥ किलासीसिधालोधौ सर्वाले सर्वर्तं म र्द्धितौ ॥ शुक्रं तेजो रेतसी च बीजवीर्येन्द्रियाणि ॥ ४५ ॥ मायुपित्तं कफः श्लेष्मा
स्त्रीयावृत्वगसृग्धरा ॥ पिशितं तरसं मांसं पललं क्रव्यमामिषं ॥ ४६ ॥ उत्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकं ॥ रुधिरे
41 गलो हितास्रक्ररक्तक्षतजशोणितं ॥ ४६ ॥ बुक्काग्रमांसं हृदयं हृन्मेदस्तु वपा वसा ॥ पश्चाग्रीवा शिरा मन्या नाडी तु
धमनिः सिरा ॥ ४७ ॥ तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोस्त्रियां ॥ अन्त्रं पुरीतद्गुल्मस्तु प्लीहा पुंस्यथ वस्नसा ॥ ४८
स्नायुः स्त्रियां कालखण्डयकृती तु समे इमे ॥ सृणिका स्यन्दिनी लाला दूषिका नेत्रयोर्मलं ॥ ४९ ॥ स्त्रं पुरस्तावउचा ॐ
रा वस्कलैशमलं स्नहकृत ॥ पुरीषं गूथवर्चस्कमस्त्री विष्ठाविशौ स्त्रियां ॥ ५० ॥ स्यात्कर्परः कपालोस्त्री कीकसं [illegible] राम
२
४१

संकुल्यमस्थि च ॥ स्यात्कूर्परास्तु कंकालः पृष्ठास्थ्नि तु कशेरुका ॥ ५१ ॥ शिरास्थनि करोटिः स्त्री पार्श्वास्थनि तु पर्शुका
अंगं प्रतीकोऽवयवोऽपघनोऽथ कलेवरं ॥ ५२ ॥ गात्रं वपुः संहननं शरीरं वर्ष्म विग्रह ॥ कायो देहः क्लीबपुंसोः स्त्रियां मूर्त्ति
स्तनुस्तनूः ॥ ५३ ॥ पादाग्रं प्रपदं पादः पदंघ्रिश्चरणोऽस्त्रियां ॥ तद्ग्रंथी घुटिके गुल्फौ पुमान्पार्ष्णिस्तयोरधः ॥ ५४ ॥ जंघा
तु प्रसृता जानूरुपर्वाष्ठीवदस्त्रियाम् ॥ सक्थि क्लीबे पुमानूरुस्तत्संधिः पुंसि वंक्षणः ॥ ५५ ॥ गुदं त्वपानं पायुर्ना बस्तिर्नाभे
रधो द्वयोः ॥ कटो ना श्रोणिफलकं कटिः श्रोणिः ककुद्मती ॥ ५६ ॥ पश्चान्नितंबः स्त्रीकट्याः क्लीबे तु जघनं पुरः ॥ ॥ ५७ ॥ कूपकौ तु नितंबस्थौ द्वयहीने कुकुंदरे ॥ ५७ ॥ स्त्रियां स्फिचौ कटिप्रोथावुपस्थो वक्ष्यमाणयोः ॥ भगं योनिर्द्वयोः शि
श्नो मेढ्रो मेहनशेफसी ॥ ५८ ॥ मुष्कोऽण्डकोशो वृषणः पृष्ठवंशाधरे त्रिकम् ॥ पिचण्डकुक्षी जठरोदरं तुंदं स्तनौ कुचौ ॥ ५९ ॥
चूचुकं तु कुचाग्रं स्यान्न ना क्रोडं भुजान्तरं ॥ उरो वत्सं च वक्षश्च पृष्ठं तु चरमं तनोः ॥ ६० ॥ स्कन्धो भुजशिरोंऽसोऽस्त्री संधी तस्यै
व जत्रुणी ॥ बाहुमूले उभे कक्षौ पार्श्वमस्त्री तयोरधः ॥ ६१ ॥ मध्यमं चावलग्नं च मध्योऽस्त्री द्वौ परौ द्वयोः ॥ भुजबाहू प्र

कट्याः
मामामम
उ

ॐ

स्रू॰ को

दि॰ ४२

५२

कोष्टो दोः स्यात्कफोणिस्तु कूर्परः ॥ ६२ ॥ अस्योपरि प्रगण्डः स्यात्प्रकोष्ठस्तस्य चाप्यधः ॥ मणिबन्धादाकनिष्ठं करस्य करभो
बहिः ॥ पंचशाखः शयः पाणिस्तर्ज्जनी स्यात्प्रदेशिनी ॥ अंगुल्यः करशाखाः स्युः ॥ पुंस्यंगुष्ठः प्रदेशिनी ॥ ६३ ॥ मध्यमा
नामिका चापि कनिष्ठा चेति ताः क्रमात् ॥ पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियां ॥ ६४ ॥ प्रादेशतालगोकर्णास्त
र्ज्जन्यादियुते तते ॥ अंगुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशांगुलः ॥ ६५ ॥ पाणौ चपेटप्रतलप्रहस्ता विस्तृतांगुलौ ॥ द्वौ संह
तौ संहततलप्रतलौ वामदक्षिणौ ॥ ६६ ॥ पाणिर्निकुब्जः प्रसृतिस्तौ युतावंजलिः पुमान् ॥ प्रकोष्ठे विस्तृतकरे हस्तो मुष्ट्या
बद्धया ॥ ६७ ॥ सरत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना ॥ व्यामो बाह्वोः सकरयोस्ततयोस्तिर्य्यगंतरं ॥ ६८ ॥ ऊर्ध्ववि
स्तृतदोःपाणिनृमाने पौरुषं त्रिषु ॥ कण्ठो गलोऽथ ग्रीवायां शिरोधिः कंधरेत्यपि ॥ ६९ ॥ कंबुग्रीवा त्रिरेखा सावटुः घाटा
कृकाटिका ॥ वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखं ॥ ७० ॥ क्लीबे घ्राणं गंधवहा घोणा नासा च नासिका ॥ ओष्ठाधरौ रा॰ ५
तु रदनच्छदौ दशनवाससी ॥ ७१ ॥ अधस्ताच्चिबुकं गण्डौ कपोलौ तत्परा हनुः ॥ रदना दशना दन्ता रदास्तालु तु काकुदं ॥ ७२ ४२

रसज्ञा रसना जिह्वा प्रांतावोष्ठस्य सृक्किणी ॥ ललाटमलिकं गोधिरूर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियां ॥ ७३ ॥ कूर्चमस्त्री भ्रुवोर्मध्यं
तारकाक्ष्णः कनीनिका ॥ लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ॥ ७४ ॥ दृग्दृष्टी चास्रु नेत्रांबु रोदनं चास्रमस्रु च
अपांगौ नेत्रयोरंतौ कटाक्षोपांगदर्शने ॥ ७५ ॥ कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ॥ उत्तमांगं शिरः शी
र्षं मूर्धा ना मस्तकोस्त्रियां ॥ ७६ ॥ चिकुरः कुंतलो वालः कचः केशः शिरोरुहः ॥ तद्वृंदे कैशिकं कैश्यमलकाश्चूर्णकुंत
लाः ॥ ७७ ॥ ते ललाटे भ्रमरकाः काकपक्षः शिखंडिकः ॥ कबरी केशवेशोथ धम्मिल्लाः संयताः कचाः ॥ ७८ ॥
शिखा चूडा केशपाशी व्रतिनस्तु सटा जटा ॥ वेणि प्रवेणी शीर्षण्य शिरस्यौ विशदे कचे ॥ ७९ पाशः पक्षश्च हस्तश्च
कलापार्थाः कचात्परे ॥ तनूरुहं रोम लोम तद्वृद्धौ श्मश्रु पुं मुखे ॥ ८० ॥ आकल्पवेशौ नेपथ्यं प्रतिकर्म प्रसाधनं ॥ दशैते त्रिष्वलं
कर्तालंकरिष्णुश्च मंडितः ॥ ८१ ॥ प्रसाधितोलंकृतश्च भूषितश्च परिष्कृतः ॥ विभ्राड्भ्राजिष्णुरोचिष्णू भूषणं स्यादलंक्रिया ॥
८२ ॥ अलंकारस्त्वाभरणं परिष्कारो विभूषणं ॥ मंडनं चाथ मुकुटं किरीटं पुंनपुंसकं ॥ ८३ ॥ चूडामणिः शिरोरत्नं तरलो

ॐ

१३० को
द्वि० ४३

हारमध्यगः ॥ बालपाश्या पारितथ्या पत्रपाश्या ललाटिका ॥ ८४ ॥ कर्णिका तालपत्रं स्यात्कुंडलं कर्णवेष्टनं ॥ ग्रैवेयकं क
ण्ठभूषा लंबनं स्याल्ललंतिका ॥ ८५ ॥ स्वर्णैः प्रालंबिकाथोरःसूत्रिका मौक्तिकैः कृता ॥ हारो मुक्तावली देवच्छंदोसौ शतय
ष्टिकः ॥ ८६ ॥ हारभेदा यष्टिभेदाद्गुच्छगुच्छार्धगोस्तनाः ॥ अर्धहारो माणवक एकावल्येकयष्टिका ॥ ८७ ॥ सैव नक्षत्रमा
ला स्यात्सप्तविंशतिमौक्तिका ॥ आवापकः पारिहार्यः कटको वलयोस्त्रियां ॥ ८८ ॥ केयूरमंगदं तुल्ये अंगुलीयकमूर्मिका
साक्षरांगुलीमुद्रा स्यात्कंकणं करभूषणं ॥ ८९ ॥ स्त्रीकट्यां मेखला कांची सप्तकी रशना तथा ॥ क्लीबे सारसनं चाथ
पुंकट्यां शृंखलं त्रिषु ॥ ९० ॥ पादांगदं तुलाकोटिर्मंजीरो नूपुरोस्त्रियां ॥ हंसकः पादकटकः किंकिणी क्षुद्रघंटिका ॥ ९१ ॥ त्वक्
फलकृमिरोमाणि वस्त्रयोनिर्दश त्रिषु ॥ वाल्कं क्षौमादि फालं तु कार्पासं बादरं च तत् ॥ ९२ ॥ कौशेयं कृमिकोशोत्थं राङ्क
वं मृगरोमजं ॥ अनाहतं निष्प्रवाणि तंत्रकं च नवांबरे ॥ ९३ ॥ तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगं ॥ पत्रोर्णं धौतकौ
शेयं बहुमूल्यं महाधनं ॥ ९४ ॥ क्षौमं दुकूलं स्याद्द्वे तु निवीतं प्रावृतं त्रिषु ॥ स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्वस्तयोर्द्वयोः ॥

ॐ
राम
४३

दैर्घ्यमायाम आरोहः परिणाहो विशालता ॥ पटच्चरं जीर्णवस्त्रं समौ नक्तककर्पटौ ॥ ९५ ॥ वस्त्रमाच्छादनं वासश्चेलं वसनमंशु-
कं ॥ सुचेलकं पटोऽस्त्री वरासिः स्थूलशाटकः ॥ निवृत्तरीयोपसंव्यानपरिधानान्यधोंऽशुके ॥ द्वौ प्रावारोत्तरासंगौ समौ बृहतिका
तथा ॥ ९७ ॥ निचोलः प्रच्छदपटः समौ रल्लककंबलौ ॥ संव्यानमुत्तरीयं च चोलकूर्पासकः स्त्रियां ॥ ९८ ॥ नीशारस्तु प्रावरणे
हिमानिलनिवारणे ॥ अर्धोरुकं वरस्त्रीणां स्याच्चंडातकमंशुकम् ॥ ९९ स्यात्त्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत् ॥ अस्त्री वि-
तानमुल्लोचो दूष्याद्यं वस्त्रवेश्मनि ॥ १०० ॥ प्रतिसीरा यवनिका स्यात्तिरस्करिणी च सा ॥ परिकर्मांगसंस्कारः स्यान्मार्ष्टिर्मार्ज-
ना मृजा ॥ उद्वर्तनोत्सादने द्वे समे आप्लाव आप्लव ॥ स्नानं चर्चा तु चार्चिक्यं स्थासकोऽथ प्रबोधनं ॥ १०२ ॥ अनुबोधः पत्रलेखा
पत्रांगुलिरिमे स्त्रियौ ॥ तमालपत्रतिलकचित्रकाणि विशेषकं ॥ १०३ ॥ द्वितीयं च तुरीयं च न स्त्रियामथ कुंकुमम् ॥ का-
श्मीरजन्माग्निशिखं वरं बाह्लीकपीतने ॥ १०४ ॥ रक्तसंकोचपिशुने धीरं लोहितचंदने ॥ लाक्षा राक्षा जतु क्लीबे यावो

अ॰ को
द्वि ४४
५५

ह

रक्षोद्भुमालयः ॥ १०५ ॥ लवंगं देवकुसुमं श्रीसंज्ञमथ जायकम् ॥ कालीयकं च कालानुसार्यं चाथ समर्थकम् ॥ १०६ ॥ वंशिकागुरु रा
जार्हं लोहं कृमिजजोंगकं ॥ कालागुर्वगुरु स्यात्तु मंगल्यामल्लिगंधि यत् ॥ १०७ ॥ यक्षधूपः सर्ज्जरसो रालसर्ज्जरसावपि ॥ बहुरूपो
प्यथ वृकधूपकृत्रिमधूपकौ तुरुष्कः पिंडकः सिल्हो यावनोप्यथ पायसः श्रीवासो वृकधूपोपि श्रीवेष्टसरलद्रवौ १०९ मृगनाभिर्मृगमद
कस्तूरी चाथ कोलकं कक्कोलकं कोषफलम[थ कर्]पूरमस्त्रियाम् ११० घनसारश्चंद्रसंज्ञः सिताभ्रो हिमवालुकः गंधसारो मलयजो
भद्रश्रीश्चंदनोस्त्रियाम् १११ तैलपर्णिकगोशीर्षे हरिचंदनमस्त्रियाम् तिलपर्णी तु पत्रांगं रंजनं रक्तचन्दनम् ११२ कुचंदनं चाथ
जातीकोषजातीफले समे कर्पूरागुरुकस्तूरीकक्कोलैर्यक्षकर्दमः ११३ गात्रानुलेपनी वर्त्ती वर्णकं स्याद्विलेपनम् चूर्णा
नि वासयोगास्स्युर्भावितं वासितं त्रिषु ११४ संस्कारो गन्धमाल्याद्यैर्यस्स्यात्तदधिवासनम् माल्यं मालास्रजौ मूर्ध्नि केशमध्ये
तु गर्भकः प्रभ्रष्टकं शिखालंबि पुरोन्यस्तं ललामकम् प्रालंबमृजुलंबि स्यात्कण्ठाद्वैकक्षिकं तु तत् ११६ यत्तिर्यक्क्षिप्तमु
रसि शिखास्वापीडशेखरौ रचना स्यात्परिस्पंदः आभोगः परिपूर्णता उपधानं तूपबर्हः शय्यायां शयनीयवत् शयनं मंचप

शयनंमञ्चपर्य्यंकपल्यंकाः खट्वयासमाः गेंडुकः कंदुकोदीपः प्रदीपः पीठमासनं समुद्गकः संपुटकः
प्रतिग्राहः पतद्ग्रहः प्रसाधनीकंकतिकापिष्टातः पटवासकः दर्प्पणेमुकुरादर्शौ व्यजनंतालवृन्तकम्
इत्यमरसिंहकृतौ नरवर्गः संततिर्गोत्रजननकुलान्यभिजनान्वयौ वंशोऽन्ववायः संतानोवर्णाःस्यु
र्ब्राह्मणादयः राजबीजीराजवंश्योबीज्यस्तुकुलसंभवः महाकुलीकुलीनार्य्यसभ्यसज्जनसा
धवः ब्रह्मचारीगृहीवानप्रस्थोभिक्षुश्चतुष्टये आश्रमोऽस्त्रीद्विजात्यग्रजन्मभूदेववाडवाः विप्रश्चब्राह्म
णोसौषट्कर्मायागादिभिर्युतः संमांत्रिकोजैमनिर्यो वेदंजीवन्नस्तुवाहिनी वैतालिकस्यालुकामो
गतास्युन्यवादनी नैयायकः स्याद्वेदपादः सामादीककग्राहीनः विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः
कोविदोबुधः धीरोमनीषीज्ञः प्राज्ञः संख्यावान्पण्डितः कविः धीमान्सूरिः कृतीकृष्टिर्लब्धवर्णोविच
क्षणः दूरदर्शीदीर्घदर्शी श्रोत्रियश्छान्दसौसमौ उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः मंत्र

व्याख्याकृदाचार्यस्यादिष्टान्वाधेरेवती यद्यग्नेस्तमानोयस्सोमवतिदीक्षितः इत्याश्रीलायायनकोय
त्याग्निविधिनेष्टवान् सर्गाध्यनीत्या पतितोमपितीतसोमपाः सर्ववेदाः सर्वेनैष्टोयागाः सर्वसद
म५५ इक्षिणा मन्त्रवानुष्ठवनेसंगेधीनीगृहोलया लध्यान्ययस्तसमावृत्तः स्नानानमिषवेकृते कृत्वाने
वासिनो शिष्यो शेषस्यमकालिक एवंस्नानानाचारामियसः ब्रह्मचारिणाः सतीर्थ्याखिकारतेः स्थि
नवानामिमर्गिविन् पारंपार्यो पदेसस्याष्टैतिष्ठमितिहायमे उपलालानमात्यामालान्वारभउ
पक्रमन यज्ञः सर्वोपयोयागः सप्ततन्तुर्मखक्रतु पाठेहोम आतिथीनां सपर्यान्तर्पणां वलिः एते
पंचमहायाज्ञावसन्ययस्ताः दिनामकाः अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् होमो दैवो बलिर्भौतो नृयज्ञोति
थिपूजनं सभ्यापरीषद्गोष्ठी सभासमितिसंसदः आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदा प्राग्वं
शः प्राग्हविर्गेहात्सदस्याविधिदर्शिनसभासदः सभास्तारासभ्यासामाजिकाश्चते अध्वर्यूद्गातृहोता

ग्रेयजस्मामर्विंदःक्रमात ग्गान्नीध्रद्याधनैवीद्याम्नत्रीजोयाकाश्चते वेद्दिः परीक्षृत्ता भूमि
समेस्थंडिलचतुर्भे वरवालोयप्रकटकोकुंवास्तुगहनवृनी यूपान्ततर्मनिर्म्मायद्वादशारि
त्वरणिर्हृयो इति तान्निर्माहुंपत्याहवनियैश्चयोग्नयः ग्गानिवयमदंष्टता प्रणीतस्सद्भृतो नला
प्रत्यूह्यपरिवायोयावा यवमौप्रयोगिन। योगाहूमत्याद्यानीबादह्लीणांनिप्रणीतये नस्मिन्न
नायोयाग्नौयीलहाव हतभू क्रिया सक्तामध्ये नीधामाव यास्यादग्निसमिधने गायत्री प्रह
स्वंकुदैहव्यागाकेवलपुमान त्रमिवासमस्तेनोसे याद्धीरेस्याद्धियामज्ज धवित्रंव्याजननस्वरवि
म्याकरममा यघटाजां सद पुजेय मार्गेवयायकं हव्याव्देवपेत्रे याम्नेपागं सावाटीकं
धाबोप भजपुनाव सबोमेटा वचः स्त्रिया उपहृताय श्रुरसौयेभिमंत्र सुवाहिकं पप्रसंकेन
समनंबे नामानत्रकोवघ वाचलिगाप्रमितोया सपवित्रमोदितह्ते सान्नाय्यंयहविरमौनवन
त्रिपुवसहूकं दीर्घोनोवम्

योयद्देनन स्मोहनयतिन ॥ तिमयकनुकर्मैहं पूर्ने स्नानाह्निकर्मेति ॥ गमन्तं विद्यसो
न घेहयतमेधमोजननशेषयो ॥ स्यागोविह्यायिदंदाना मनसजनविसर्जने ॥ आम्नानं विनसो
सर्पणे प्रतिपादनं ॥ गोदशानं निर्वपरामपवर्जनेन नर्पाः इति ॥ तार्थानहृहदानं त्रिभु
56 ष्याद्दोह्ने दैहिके ॥ पितृदानं निवापः स्यात्स्नाद्धं तत्कर्मस्नाह्नना ॥ मन्वाहार्यं मासिके सो
ह्रमोद्भः कृतपोस्त्रियां पर्तिपैतृगतमपरिहस्नान्वेहनमावनवेष्टाननम ॥ तनिस्वधोमता
यत्राभिमलियानर्थेना ॥ घटनुविषुघ्मम्नोर्थेपाद्योपादायवाविती ॥ कुमादोतिथ्यातिथे
यावनिष्यार्थिंत्रसाधुनी ॥ स्नुहाविशिस्मातंनूरनिषिनोगच्छगने ॥ मधुयाकमधूनिकावमधु
स्यानंनगोरवं ॥ पूजनमःस्यापचितिः सपर्याचीर्हणाः समाः ॥ वरिवस्यातुश्रूषापरीष्या
मुपासनं ॥ व्रज्याटत्यापर्यटनं चर्यानीपथिस्थितिः उपस्पर्शस्त्वाचमनमथमौनमभाषणं

मनपूर्वीम्ह यांचवन्ताबी पाटीत्प्रकृमन पर्याभातिपा लखु स्थानपर्यायउपन्याय:निय
मोब्रतमहिन खोपवा ला दिपुन्यकं गोपर हंगपवासो विवेक: प यमान्मना स्त्राहु स्व
र्वसंवनाध्यायनतिरयाग लिध: पाठ ब्रह्मांजली पठे विमुतोब्रह्मविदव: ध्यान योगम
ने ब्रह्मा संकें लो विधीकृमो मुख्यस्त्या नमम लोन कलपलुनमोधमा हंसकाएवं
हरां स्याद्रु पका गांश्रुने हमेव पादागणंस्याद्रूपाकरणाश्रुने मिवपरिग्रादकर्मदीया
गणाख्या पिमस्काबी नपहिनापम: पारी का हिवा वयमामुती: नपक्रेशमहोदंनेव ॥
पीर्वी स्त्या रीपा मध्यस्त वचम: यानकल्पा स्वनो प्रती येनिर्मितन्त्रि यमामा पनिनोयन
यश्चते य: श्वद लैंग्रनवशाह्मने षाटिलपणपहो स्पादिलस्या विरजलमम स्वदे याति
मा: पवि त्र: मयत प्त पामवंजा: मर्वत्न हिन पालाम्मो ६

दुर्वासाद्यैर्द्विजैरंभस्तत्रैवोक्ता महेश्वरमस्तुतस्तु कुलीश्वरनामास्तं वदामि अजितं वर्णमिकृत्तिर्मेतं
भिताकं देवकं स्वध्याय: स्याज्जप: स्तुत्या भिवः कृतं वदा सर्वे तस्मात् धंसिजयं त्रिवर्णमर्दलं
दर्शनात्मयोगो मात्स्य यामोपलानयाः पुत्रकु शरीर साधनावेदेना नित्यं यत्कर्ममनपातः नियमस्तव
कर्म नित्यं मासंमस्याधं कौ ओं ईंकोनितमकः सिद्धान्ती आद्यमार्गिका पांचरात्रिकः पाशुपतो
नकुलेशान महाव्रती कपाली सामसिद्धान्ती त्रिकस्य द्वितीयहकु यामलोहमार्गी स्यात्रिकमे
दीक्षाहितः दक्षिणाची महामार्गी भैरवी दत्ति तागमे शाक्तोकमहोनि स्तकः कालाग्नातिकः
रूपे वैकायनेस्तामावुर्वेदेस्तव: पांचरात्रिका शाक्तास्त्रवेद तनधूप कायप्रवणा वर्तिका क्रि
होमेतः शुनकरः स्थपतात्वद्धेवराः नपाटः प्राक्को द्वीपा निर्णया लीवको होरंगमशोकर
लोमहृदनेव पन्ने त्रिवु कला परिवक्को पीने शाकोग हिलितिलदान: नतिहितो नमस्कार: प्र
णामस्यनमस्क्रिया उपवीतं यतस्वप्रदन्ते दहिलोकरे प्राचीनावीनमस्या सिवितवीतं कंठे